# A HYMN TO VIVEKANANDA

ओं तत् सत्

"शतमप्यस्तु कर्णानां सहस्रं वास्तु चेतसां ।
तथापि त्वद्गुणन्यासं कः पुमानवधारयेत्" ॥१॥

वन्दे श्रीरामकृष्णार्षिं शान्तमूर्तिं जगद्गुरुं ।
विवेकानन्दनेतारं नरदेवं गुरोर्गुरुम् ॥२॥

अज्ञानाधिपरिक्लिष्टां देशं नेतुमनामयं ।
विवेकानन्दवैद्यानां भावचिन्तामणीन्भजेत् ॥३॥

वेदान्तेषु निपीयमानसदसज्ज्ञानामृतपूरितो ।
मोहाकलितमोक्षमार्गविलयासहस्त्वद्वैतदीपं वहन् ।
सिंहध्वानसमानवीरवचनैरात्मस्थितिं ख्यापयन् ।
जानन् लोकविजृम्भितावगुणान्स्वतो हि
स्नेहं ददत् ॥४॥

श्रीमच्छंकरयोगिराजपदवीं ज्ञानावदातां व्रजन् ।
लीलामानुषवेषधारिसमतां रूपेण चासूचयन् ।
कर्तव्यं निगमानुदिष्टविधिना कालानुगुण्यं चरन् ।
भक्तं भक्तिरसेन कर्मिणमसौ कार्येण चोद्बोध-
यन् ॥ ५ ॥

जगद्व्यापिप्रेम्णा नयनसुभगः सर्वपुरुषैः ।
समाराध्यो भूत्वा सुजनहृदये नित्यभवने ।
सदाऽस्थानं कुर्वन्निरुपमितमृत्युंजयसमो ।
विवेकानन्दो नोऽविदितनिजशोभानवतु वै ॥६॥

महिम्नस्ते हेतुः किमपि तव पाश्चात्यविजयः ।
किमेतद्विद्याख्यं स्तुतमिह यदन्तर्धनमिति ।
किमिदं वाग्जालं तव विषयसंगेऽप्यमलधीः ।
किमेषा त्वल्लक्ष्मीस्त्रिभुवनविशालं नु च यशः ॥७॥

किमेतद्रूपं वा निखिलजनमोहोपजनकं ।
गिरां माधुर्यं वा मृतजनविजाड्यं हरति यत् ।
स्वदेशे रक्तिर्वा स च पतितजीवेषु करुणा ।
न जाने दिव्यं ते परमहिमहेतुं गुणनिधे ॥८॥

इति श्रीमहाभाष्यंसुब्रह्मण्यविरचितं श्रीमद्वि-
वेकानन्दस्तोत्रं संपूर्णम् ।

## OM TAT SAT

1. "Let there be a hundred ears, or a thousand hearts (in one), even then who can ascertain thy worth fully?"

2. I bow to Sri Ramakrishna, of serene appearance, the Seer, the world-teacher, the Master of Vivekananda, the divine Man, the Guru of my Guru.

3. To make the Motherland weakened by her agony of ignorance, free from disease, one must have recourse to the *Chintamani*-like* thoughts of that Healer, Vivekananda.

4. He who was saturated with the nectar of discrimination of the real and the unreal, drunk deep from the Vedanta Scriptures; who unable to bear the decay of the path of Moksha darkened by delusion, carried the torch-light of the Advaita; who proclaimed by heroic words, with a voice resembling a lion's roar, the abiding in the Atman; who aware of the defects pervading all men, extended love (to them) by His own nature;

5. He who walked the path, purified by illumination, of Srimat Sankara, the prince of Yogis; who revealed by His personality that He was as one who was wearing the human disguise merely out of sport; who performed His duties according to the rules laid down in the Shastras, suiting them to the needs of the times; who roused the Devotee by His sweet flow of Bhakti, and the Worker by His deeds;—

6. May He, Vivekananda,—charming to the eye, adored by all, who resides in that eternal home—the hearts of good men. even as the peerless conqueror of Death (Shiva),—protect us who are unconscious of our own divinity, by His world-embracing love.

7. The reason of Thy greatness—is it Thy conquest of the West? or is it that learning which is praised on earth as an internal treasure? or Thy oratory? or Thy discrimination unsullied even in its contact with worldly things? or is it Thy good luck? or Thy fame extending all over the world?

8. Or is it thy handsome form which fascinates everyone? or is it the exquisite beauty of Thy words that resuscitates the dead, as it were, to life? or is it Thy love for Thy Motherland? or is it Thy well-known compassion for the fallen masses?—I do not know what is the supreme cause of Thy great glory, O Thou ocean of virtues!

MAHABHASHYAM SUBRAHMANYAH.

---

* A fabulous gem supposed to yield to its possessor whatever is desired.